श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ द्विसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विसप्ततितमः सर्गः ॥

## श्रीरामलक्ष्मणाभ्यां चिताग्निना कबन्धस्य दाहो दिव्यरूपं धृत्वा तेन श्रीरामाय सुग्रीवेण सह मैत्रीं कर्तुं संमतिदानम्

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ।
गिरिप्रदरमासाद्य पावकं विससर्जतुः ॥ **3.72.1** ॥

लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समन्ततः।
चितामादीपयामास सा प्रजज्वाल सर्वतः ॥ **3.72.2** ॥

तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत्।
मेदसा पच्यमानस्य मन्दं दहत पावकः ॥ **3.72.3** ॥

सविधूय चितामाशु विधूमोऽग्निरिवोत्थितः।
अरजे वाससी बिभ्रन्माल्यं दिव्यं महाबलः ॥ **3.72.4** ॥

ततश्चिताया वेगेन भास्वरो विरजाम्बरः।
उत्पपाताशु संहृष्टः सर्वप्रत्यङ्गभूषणः ॥ **3.72.5** ॥

विमाने भास्वरे तिष्ठन् हंसयुक्ते यशस्करे।
प्रभया च महातेजा दिशो दश विराजयन् ॥ **3.72.6** ॥

सोऽन्तरिक्षगतो वाक्यं कबन्धो राममब्रवीत्।
शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि ॥ **3.72.7** ॥

राम षड् युक्तयो लोके याभिः सर्वं विमृश्यते।
परिमृष्टो दशान्तेन दशाभागेन सेव्यते॥ **3.72.8** ॥

दशाभागगतो हीनस्त्वं हि राम सलक्ष्मणः।
यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम्॥ **3.72.9** ॥

तदवश्यं त्वया कार्यः स सुहृत् सुहृदां वर।
अकृत्वा नहि ते सिद्धिमहं पश्यामि चिन्तयन्॥ **3.72.10** ॥

श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः।
भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना॥ **3.72.11** ॥

ऋष्यमूके गिरिवरे पम्पापर्यन्तशोभिते।
निवसत्यात्मवान् वीरश्चतुर्भिः सह वानरैः॥ **3.72.12** ॥

वानरेन्द्रो महावीर्यस्तेजोवानमितप्रभः।
सत्यसन्धो विनीतश्च धृतिमान् मतिमान् महान्॥ **3.72.13** ॥

दक्षः प्रगल्भो द्युतिमान् महाबलपराक्रमः।
भ्रात्रा विवासितो वीर राज्यहेतोर्महात्मना॥ **3.72.14** ॥

स ते सहायो मित्रं च सीतायाः परिमार्गणे।
भविष्यति हि ते राम मा च शोके मनः कृथाः॥ **3.72.15** ॥

भवितव्यं हि तच्चापि न तच्छक्यमिहान्यथा।
कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः॥ **3.72.16** ॥

गच्छ शीघ्रमितो वीर सुग्रीवं तं महाबलम्।
वयस्यं तं कुरु क्षिप्रमितो गत्वाद्य राघव॥ **3.72.17** ॥

अद्रोहाय समागम्य दीप्यमाने विभावसौ।
न च ते सोऽवमन्तव्यः सुग्रीवो वानराधिपः॥ **3.72.18** ॥

कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान्।
शक्तौ ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितम्॥ **3.72.19**॥

कृतार्थो वाकृतार्थो वा तव कृत्यं करिष्यति।
स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः॥ **3.72.20**॥

भास्करस्यौरसः पुत्रो वालिना कृतकिल्बिषः।
सन्निधायायुधं क्षिप्रमृष्यमूकालयं कपिम्॥ **3.72.21**॥

कुरु राघव सत्येन वयस्यं वनचारिणम्।
स हि स्थानानि कात्स्न्र्येन सर्वाणि कपिकुञ्जरः॥ **3.72.22**॥

नरमांसाशिनां लोके नैपुण्यादधिगच्छति।
न तस्याविदितं लोके किञ्चिदस्ति हि राघव॥ **3.72.23**॥

यावत् सूर्यः प्रतपति सहस्रांशुः परन्तप।
स नदीर्विपुलान् शैलान् गिरिदुर्गाणि कन्दरान्॥ **3.72.24**॥

अन्विष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति।
वानरांश्च महाकायान् प्रेषयिष्यति राघव॥ **3.72.25**॥

दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम्।
अन्वेष्यति वरारोहां मैथिलीं रावणालये॥ **3.72.26**॥

स मेरुशृङ्गाग्रगतामनिन्दितां
  प्रविश्य पातालतलेऽपि वाश्रिताम्।
प्लवङ्गमानामृषभस्तव प्रियां
  निहत्य रक्षांसि पुनः प्रदास्यति॥ **3.72.27**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विसप्ततितमः सर्गः॥